M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 824

Title: Narayanopanishad

824

नारायणोपनिषद्

Nārāyanopanishad	Title
	Author
	Editor
	Year. Vols.
	Publisher
824	Remarks

श्रीगणेशायनमः हरिःॐ सहनाववतु सहनौभुनक्तु सहवीर्यंकरवावहै तेजस्विनावधीतमस्तुमा
ना.उ विद्विषावहै ॐ शांतिः शांतिः शांतिः अंभस्यपारेभुवनस्यमध्येनाकस्यपृष्ठेमहतोमहीयान् शुक्रेण
१ ज्योतींषिसमनुप्रविष्टः प्रजापतिश्चरतिगर्भेअंतः यस्मिन्निदंसंचविचैतिसर्वंयस्मिन्देवाअधिविश्वे
निषेदुः तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमेव्योमन् येनावृतंखंचदिवंमहींचयेनादित्यस्तपतितेज
साभ्राजसाच यमंतः समुद्रेकवयोवयंतियदक्षरेपरमेप्रजाः यतःप्रसूताजगतःप्रसूतीतोयेनजीवान्व्यच
सर्जभूम्यां यदोषधीभिः पुरुषान्पशूंश्चविवेशभूतानिचराचराणि अतःपरंनान्यदणीयसंहिपरा
त्परंयन्महतोमहांतं यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात् १ तदेवर्तंतदुसत्यमाहुस्तदेवब्र
ह्मपरमंकवीनां इष्टापूर्तंबहुधाजातंजायमानंविश्वंबिभर्तिभुवनस्यनाभिः तदेवाग्निस्तद्वायुस्तत्सूर्यस्त
दुचंद्रमाः तदेवशुक्रममृतंतद्ब्रह्मतदापःसप्रजापतिः सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि कलामुहूर्ताः
काष्ठाश्चाहोरात्राश्चसर्वशः अर्धमासामासाऋतवःसंवत्सरश्चकल्पंतां सआपःप्रदुघेउभेइमेअंतरिक्षम
थोसुवः नैनमूर्ध्वंनातिर्यंचंनमध्येपरिजग्रभत् नतस्येशेकश्चनतस्यनाममहद्यशः २ नसंदृशेतिष्ठति
रूपमस्यनचक्षुषापश्यतिकश्चनैनं हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंति अद्भ्यःसंभूतोहि
रण्यगर्भइत्यष्टौ एषहिदेवःप्रदिशोनुसर्वाः पूर्वोहिजातःसउगर्भेअंतः सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखा
स्तिष्ठतिविश्वतोमुखः विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात् संबाहुभ्यांनमतिसंपतत्रैर्द्यावापृथि
वीजनयन्देवएकः वेनस्तत्पश्यन्विश्वाभुवनानिविद्वान्यत्रविश्वंभवत्येकनीडं यस्मिन्निदंसंचविचैकंसओतः
प्रोतश्चविभुःप्रजासु प्रतद्वोचेअमृतंनुविद्वान्गंधर्वोनामनिहितंगुहासु ३ त्रीणिपदानिहितागुहासुयस्तद्वेद

ना.योप. सवितुःपितासत् सनोबंधुर्जनितासविधाता धामानिवेदभुवनानिविश्वा यत्रदेवाअमृतमानशानास्तृतीयेधा
२ मान्यभ्यैरयंत परिद्यावापृथिवीयंतिसद्यःपरिलोकानूपरिदिशःपरिसुवः सतस्यतंतुंविततंविततंविचृत्यतदप
श्यत्तदभवत्प्रजासु परीत्यलोकान्परीत्यभूतानिपरीत्यसर्वाःप्रदिशोदिशश्च प्रजापतिःप्रथमजाऋतस्यात्मना
त्मानमभिसंबभूव सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं सनिंमेधामयासिषं उद्दीप्यस्वजातवेदोपघ्नंनिरृतिंम
म ४ पशूंश्चमह्यमावह जीवनंचदिशोदिश मानोहिंसीज्जातवेदोगामश्वंपुरुषंजगत् अबिभ्रदग्नआगहि श्रियामापरि
पातय पुरुषस्यविद्महेसहस्राक्षस्यमहादेवस्यधीमहि तन्नोरुद्रःप्रचोदयात् तत्पुरुषायविद्महेमहादेवायधीमहि तन्नो
रुद्रःप्रचोदयात् तत्पुरुषायविद्महेवक्रतुंडायधीमहि तन्नोदंतिःप्रचोदयात् तत्पुरुषायविद्महेचक्रतुंडायधीमहि तन्नो
नंदिःप्रचोदयात् ५ तत्पुरुषायविद्महेमहासेनायधीमहि तन्नःषण्मुखःप्रचोदयात् तत्पुरुषायविद्महेसुवर्णपक्षायधीमहि
तन्नोगरुडःप्रचोदयात् वेदात्मनायविद्महेहिरण्यगर्भायधीमहि तन्नोब्रह्माप्रचोदयात् नारायणायविद्महेवासुदेवायधी
महि तन्नोविष्णुःप्रचोदयात् वज्रनखायविद्महे तीक्ष्णदंष्ट्रायधीमहि ६ तन्नोनारसिंहःप्रचोदयात् भास्करायविद्महे
महद्द्युतिकरायधीमहि तन्नोआदित्यःप्रचोदयात् वैश्वानरायविद्महे ज्वालालीलायधीमहि अ तन्नोअग्निःप्रचोदयात् का
त्यायनायविद्महे कंन्याकुमारिधीमहि तन्नोदुर्गिःप्रचोदयात् सहस्रपरमादेवी शतमूलाशतांकुरा सर्वंहरतुमेपापं
दूर्वादुःस्वप्ननाशिनी कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ७ एवानोदूर्वेप्रतनुसहस्रेणशतेनच याशतेनप्रतनोषि
सहस्रेणविरोहसि तस्यास्तेदेवीष्टके विधेमहविषावयं अश्वक्रांतेरथक्रांते विष्णुक्रांतेवसुंधरा शिरसाधारयिष्यामि र
क्षस्वमांपदेपदे भूमिर्धेनुर्धरणीलोकधारिणी उद्धृतासिवराहेण कृष्णेनशतबाहुना मृत्तिकेहनमेपापंयन्मयादुष्कृतं
कृतं मृत्तिकेब्रह्मदत्तासि काश्यपेनाभिमंत्रिता मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं ८ मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णु
दमृत्तिके तयाहतेनपापेन गच्छामिपरमांगतिं यतइंद्रभयामहे ततोनोअभयंकृधि मघवंछग्धितवतन्नऊतयेवि
द्विषोविमृधोजहि स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी वृषेंद्रःपुरएतुनः स्वस्तिदाअभयंकरः स्वस्तिनइंद्रोवृद्ध

श्रवाःस्वस्तिनःपूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु आपांतमन्युस्तृपलप्रभर्माधुनिःशिमी
वांछरुमांऋजीषी सोमोविश्वान्यतसावनानि नार्वागिंद्रंप्रतिमानानिदेभुः ९ ब्रह्मजज्ञानंप्रथमंपुरस्तात्विसीमतःसुरुचोवेनआ
वः सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः स्योनापृथिविभवानृक्षरानिवेशनी यच्छानःशर्मसप्रथाः गंधद्वा
रांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं श्रीर्मेभजतु अलक्ष्मीर्मेनश्यतु विष्णुमुखावेदे
वाश्छंदोभिरिमांल्लोकाननपजय्यमभ्यजयन् महांइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु १० स्वस्तिनोमघवाकरोतु हंतुपाप्मानं
योस्मान्द्वेष्टि सोमानंस्वरणंकृणुहिब्रह्मणस्पते कक्षीवंतंयऔशिजं शरीरंयज्ञशमलंकुसीदंतस्मिन्सीदतुयोस्मान्द्वेष्टि
चरणंपवित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृतानि तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम सजोषाइंद्रसगणोम
रुद्भिःसोमंपिबवृत्रहन्शूरविद्वान् जहिशत्रूंरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः सुमित्रानआपओषधयःसंतु दुर्मि
त्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मः आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ११ महेरणायचक्षसे योवःशिवतमो
रसस्तस्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनः हिरण्यशृंगंवरुणं
प्रपद्येतीर्थंमेदेहियाचितः यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं तन्नइंद्रोवरुणो
बृहस्पतिःसविताचपुनंतुपुनःपुनः नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवारुण्यैनमोद्भ्यः यदपांक्रूरंयदमेध्यंयद
शांतंतदपगच्छतात् अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात् तन्नोवरुणोराजापाणिनाह्यवमर्शतु सोहमपापोविरजोनिर्मु
क्तोमुक्तकिल्बिषः नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां यश्चाप्सुवरुणःसपुनात्वघमर्षणः इमंमेगंगेयमुनेसरस्वति
शुतुद्रिस्तोमंसचतापरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया सतंचसत्यंचाभीद्धात्तपसोध्य
जायत ततोरात्रिरजायत ततःसमुद्रोअर्णवः १२ समुद्रादर्णवादधिसंवत्सरोअजायत अहोरात्राणि विदधद्विश्वस्य
मिषतोवशी सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः यत्पृथिव्यांरजस्वमांतरिक्षे

ना.उप. विरोदसी इमास्तदापोवरुणःपुनात्वघमर्षणः पुनंतुवसवःपुनातुवरुणःपुनात्वघमर्षणः एषभूतस्यमध्ये
भुवनस्यगोप्ता एषपुण्यकृतांल्लोकान्नेषमृत्योर्हिरण्मयं द्यावापृथिव्यो हिरण्मयेꣳसꣳश्रितंꣳसुवः ८
२ मनःस्कवःसꣳसिराधि आर्द्रंज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि योहमस्मिब्रह्माहम
स्मि अहमस्मिब्रह्माहमस्मि अहमेवाहंमांजुहोमिस्वाहा अकार्यकार्यवकीर्णीस्तेनोभ्रूणहागुरुतल्पगः
वरुणोपामघमर्षणास्तस्मात्पापात्प्रमुच्यते रजोभूमिस्त्वमाꣳरोदयस्वप्रवदंतिधीराः आक्रान्त्समुद्रःप्र
थमेविधर्मन्नूजनयन्प्रजाभुवनस्यराजा वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुः ८५
परस्ताद्यशोगुहासुममचक्रंतुडायधीमहि तीक्ष्णदꣳष्ट्रायधीमहिपरित्रातिष्ठितं

824